# कार्यस्य मूल्यम्

अध्यायः **१३**

> यदा भवान्तः/भवत्यः किमपि कार्यं कुर्वन्ति, तदा नान्यत् तदतिरिक्तं विचारयन्तु। तत्कार्यं पूजारूपेण परमकर्तव्यरूपेण वा पालयन्तु। किञ्च यावता तत्कार्यं न समाप्यते तावता भवतां पूर्णं जीवनमेव तस्मै कार्याय समर्पयन्तु।
>
> — स्वामी विवेकानन्दः


**महत्त्वपूर्णाः प्रश्नाः ?**

१. जनाः केषु विविधप्रकारेषु कार्येषु प्रवर्तन्ते ?

२. अस्माकं प्रात्यहिके जीवने तेषां किं योगदानम् अस्ति ?

0681CH13

अनुः, कबीरश्च उद्याने क्रीडन्तौ आस्ताम्। तदा तौ अपश्यतां यत् तेषां प्रतिवेशिनी पितृस्वसातुल्या गीता कारयानात् अवतरितवती। सा कार्यालयात् गृहम् आगच्छन्ती आसीत्, किञ्च सा स्वस्याः कार्यालयीयं वस्त्रं धृतवन्ती आसीत्। सा भारतीय-वायुसेनायाः विमानचालिका अस्ति। सा अस्माकं नगरस्य गौरवम् अस्ति।




© NCERT not to be republished









.... समीपस्थान् छात्रान् निःशुल्कं भूगोलं पाठयति ...

... अस्माकं शाकोद्यानस्य परिचर्यां करोति...

... गृहस्य कार्याणि च करोति।







मम मातापितरौ एकम् आपणं चालयतः यत्र गण-परिच्छदानि (इउनिफर्म) अन्यानि पूर्वसिद्धानि वस्त्राणि च विक्रीयन्ते। मम पिता प्रातःकाले एव आपणं गच्छति। यदा वयं विद्यालयाय निर्गच्छामः, तदा माता आपणं गत्वा पितुः साहाय्यं करोति।

यावता वयं विद्यालयात् गृहं प्रत्यागच्छामः, तावता मातापि प्रायः गृहं समागच्छति। सा एकस्मिन् स्वैच्छिके समूहेऽपि कार्यं करोति यत्र समुदायस्था महिलाः तन्तुवयनं शिक्षन्ति।

मम अग्रजं रोहनं स्मरति वा? यदा सः माम् विद्यालयात् नेतुम् आगतवान् तदा भवान् तम् अपश्यत्। सः तन्त्रांश-अभियन्ता अस्ति। सः एकस्यां संस्थायां कार्यं करोति, या संस्था सङ्गणकीयान् अनुप्रयोगान् निर्माति। समीपस्थे महाविद्यालये ये/याः युवविकासकार्यक्रमे अनुसूचिताः, तेभ्यः/ताभ्यः सा सप्ताहान्ते स्वच्छया सङ्गणकीयां दक्षतां शिक्षयति।



अहो, अनो, अस्मान् परितः सर्वे प्रतिदिनं एतावन्ति कार्याणि कुर्वन्ति!

## एहि, वयम् अन्विषामः



अनोः कबीरस्य च कथायां वर्णिताः जनाः केषु कार्येषु प्रवृत्ताः आसन्? अधोदत्तायां सरण्यां तानि कार्याणि लिखन्तु :

| कथायाः पात्राणि | येषु कार्येषु ते प्रवृत्ताः | |
|---|---|---|
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |

भिन्नप्रकारकाः क्रियाकलापाः, यथा उपरि आलोचिताः, द्वयोः समूहयोः वर्गयोः वा विभक्ताः - आर्थिकाः क्रियाकलापाः, आर्थिकेतराः क्रियाकलापाः।

**आर्थिकाः क्रियाकलापाः** ते एव कार्याणि, यानि धनेन सह सम्बद्धानि भवन्ति, धनस्य विनिमयेन वा भवन्ति, अथवा तत्र सम्बद्धानां जनानां संस्थानां वा **धनमूल्यम्** -विषयिणी भवन्ति। दृष्टान्तो यथा - कश्चन विक्रेता **विपण्यां** विद्यालयीयान् स्यूतान् विक्रीणाति, एकः कृषकः विपण्यां शस्यानि विक्रीणाति, एकः अधिवक्ता एकस्मिन् विवादे स्वीयं मतं प्रस्तौति तदर्थं **शुल्कं** च स्वीकरोति, एकः चालकः स्वीयेन पण्यवाहकेन यानेन वस्तूनि एकस्मात् स्थानात् स्थानान्तरं नयति, कर्मचारिणः याननिर्माणस्य कार्यशालायां क्रियारताः सन्ति इत्यादयः।

**धनमूल्यम् :** कस्यचित् वस्तुनः धनसम्बद्धं मूल्यं यत् तस्य वस्तुनः उपकारिताः आश्रित्य केनचित् जनेन निर्धार्यते।

**विपणी :** एकं स्थानं यत्र जनाः पण्यानां सेवानां च आदान-प्रदानेषु सम्बद्धाः भवन्ति। अत्र जनाः पण्यानि सेवाश्च वस्तूनां विनिमयेन स्वीकुर्वन्ति, परन्तु प्रायः अयं विनिमयः धनैरेव विधीयते।

**शुल्कम् :** व्यवसायिकपरामर्शस्य सेवायाः वा कृते विनिमयरूपेण व्यक्तिविशेषाय संस्थायै वा यद् धनं प्रदीयते, तत् शुल्कमिति कथ्यते। उदाहरणार्थम् वैद्याय अधिवक्त्रे च सेवायाः परामर्शस्य वा विनिमयरूपेण दत्तं शुल्कम्।

© NCERT not to be republished

आर्थिकेतराः क्रियाकलापाः ते एव कार्याणि येभ्यः धनं सम्पत्तिर्वा न जन्यते, परन्तु तानि कार्याणि प्रायः जनाः आवेगैः यथा - कृतज्ञता, प्रेम, यत्नः, आदरः इत्येतैः कुर्वन्ति। दृष्टान्तो

**वामतः दक्षिणम्, उपरिस्थात् अधः -**
एकः व्यवसायकः विपण्याम् विद्यालयीन् स्यूतान् विक्रीणाति।
कृषकाः विपण्याम् स्वीयं सस्यं विक्रीणन्ति।
एकः अधिवक्ता एकस्मिन् विवादे स्वीयं मतं प्रस्तौति।
एकः चालकः स्वीयेन पण्यवाहकेन यानेन वस्तूनि एकस्मात् स्थानात् स्थानान्तरं नयति।
कर्मचारिणः याननिर्माणस्य कार्यशालायां क्रियारताः सन्ति।







यथा - पितरौ परिवारस्य कृते भोजनं निर्मातः, विद्यालयस्य कार्यं सम्पादयितुं तेषां सन्ततीनां साहाय्यं च कुरुतः, युवकाः पितामह्योः यत्नं कुर्वन्ति, परिवारस्थाः जनाः गृहस्य संस्करणे स्वीयं श्रमं प्रददति।

वामतः दक्षिणतः-मातापितरौ परिवाराय भोजनं पाकं कुर्वन्ति।
माता स्वसन्ततिभ्यः विद्यालयकार्यार्थं साहाय्यं करोति।




© NCERT not to be republished





वामतः दक्षिणां दिशि -

पौत्री स्वपितामह्याः साहाय्यं करोति।

परिवारजनाः गृहस्य नवीनीकरणे साहाय्यं कुर्वन्ति।

## आगच्छन्तु, वयम् अन्विषामः

१८५ तमे पत्रे दत्तायां सारण्यां तृतीयः स्तम्भः रिक्तः अस्ति इति भवद्भिः लक्षितं वा? अस्य स्तम्भस्य कृते 'आर्थिकक्रियाकलापाः/आर्थिकेतरक्रियाकलापाः' इति नामकरणं कुर्वन्तु। अधुना कार्याणां स्वरूपानुसारं तानि वर्गीकृत्य स्थापयन्तु।



अनु-कबीरयोः कथायां पितृभगिनी गीता वायुसेनायाः विमानचालिका अस्ति। सा वेतनम् अपि प्राप्नोति। अतः यद्यपि सा देशस्य सेवां करोति किन्तु तस्याः कार्यं सवेतनम् अर्थात् धनसम्बद्धमस्ति। अनु इत्यस्याः भ्राता रोहणः तन्त्रांशाभियन्तारूपेण(सॉफ़्टवेयर इंजीनियर) एकस्यां संस्थायां कार्यं करोति। सः अपि वेतनं प्राप्नोति। सप्ताहान्ते रोहणः समीपस्थमहाविद्यालयस्य युवाविकासकार्यक्रमे स्वयंसेवकरूपेण कार्यं करोति, यत्र सः तरुणयुवकानां कृते सङ्गणककौशलं पाठयति । एतत् कार्यं धनं नापेक्षते । अतः एतद् आर्थिकेतरक्रियाकलापेषु अन्तर्भवति।

**वेतनम् :** सामान्यतया नियोक्तृणा कस्मैचित् कर्मचारिणे दत्ता नियमितं मासिकभुक्तिः वेतनम् इति कथ्यते।


## अस्मिन् विषये चिन्तयन्तु

- कबीरस्य पितामहः स्वेच्छया तत्स्थानस्य बालकान् निःशुल्कं पाठयति। इदं कार्यं धनसापेक्षं भवति धनानपेक्षं वा? भवतां शिक्षकाः अपि विद्यालये पाठयन्ति। कथं तद् एतस्माद् भिन्नमस्ति? सहपाठिभिः सह चर्चां कुर्वन्तु।
- भवतां कृते परिवारस्य च कृते कानि कानि आर्थिकेतरकार्याणि महत्त्वपूर्णानि सन्ति? किमर्थं तानि महत्त्वपूर्णानि?

© NCERT not to be republished

## आर्थिकक्रियाकलापानां प्रकाराः

काव्या कमलापुरग्रामे मातुलगृहं गन्तुं उत्साहिता आसीत् । मार्गे सा ग्रामस्य समीपे राजमार्गं निर्मीयमानं दृष्टवती। निर्माणस्थलं च विविधक्रियाकलापानां शब्दैः गुञ्जायमानः आसीत्। विशालाकृतेः उत्खननयन्त्राणि बुलडोजरादीनि अभिज्ञैः कौशलज्ञैः सञ्चालितानि आसन्।






अस्य नूतनस्य राजमार्गस्य निर्माणेन, समीपस्थं नगरं पञ्चघण्टायाः स्थाने केवलं घण्टाद्वये एव प्राप्तुं शक्यते। काव्या चिन्तितवती यत् एकदा अयं राजमार्गः निर्मितः चेत्, सा प्रायः स्वस्याः मातुलां द्रष्टुं शक्नुयात्, यतः तदा यात्राकालः न्यूनः भविष्यति । अनेन विचारेण प्रसन्ना काव्या स्वमातुलाम् अभिवादयितुं, तया निर्मिताः स्वादिष्टाः कुण्डलिकाश्च खादितुं त्वरितं गच्छति स्म। काव्यायाः मातुलः अपि सद्यः कार्यात् गृहं प्रत्यागत्य तैः सह मिलितवान् ।

सः एकस्यां निर्माणसंस्थायाम् कौशलज्ञत्वेन कार्यं करोति। सः च बुलडोजर् इति यन्त्रं चालयति । स्वसेवानां कृते सः मासिकं वेतनं प्राप्नोति ।

परस्मिन् दिवसे काव्यायाः मातुला शीघ्रम् उत्थाय स्वस्य गृहकार्यस्य भागं समाप्य कार्याय





प्रस्थिता। सा ग्रामस्य पत्रालये कार्यरता अस्ति, मासिकं वेतनं च प्राप्नोति। सायंकाले कार्यालयस्य कार्यानन्तरं सा छात्राणां विद्यालयपरीक्षासु सज्जताहेतोः सहायतार्थं अन्तर्जालकक्षाः अपि चालयति। एतेषां वर्गानां कृते सा साप्ताहिकं शुल्कं स्वीकरोति।



सप्ताहान्ते काव्या स्वमातुलया सह स्थानीयम् आम्रवनं गत्वा कानिचन स्वादिष्टानि आम्राणि खादितवती।

तत्र सा साहिलः नाम कञ्चन कृषिश्रमिकं दृष्टवती, यः ट्र्याक्टर्-यन्त्रस्य उपयोगेन समीपस्थस्य कस्यापि कृषकस्य क्षेत्रं कर्षन् आसीत्। सः स्वस्य श्रमस्य विनिमयेन नित्यं वेतनं प्राप्नोति। वेतनस्य किञ्चित्कम् धनराशिं सः नगदेन प्राप्नोति तथा देयस्य अवशिष्टं भागं समानमूल्यस्य आम्ररूपेण प्राप्नोति। तस्य कार्यस्य मूल्यत्वेन यानि आम्राणि सः प्राप्नोति तानि **'पेमेन्ट इन काइन्ड'** इति उच्यते । 'पेमेन्ट इन काइन्ड' इति शब्देन वस्तुमाध्यमेन भुक्तिः इत्यर्थः बोध्यते।

**वेतनम् -** नियोक्तृणा विशिष्टकालपर्यन्तं स्वकर्मचारिणे यद् धनं प्रदीयते तद् भुक्तिः इति कथ्यते।

**पेमेन्ट इन काइन्ड :** स्वस्य श्रमस्य कृते अर्थमूल्यस्य समपरिमाणेन वस्तुना या भुक्तिः प्रदीयते सा वस्तुमाध्यमेन भुक्तिः इति कथ्यते।

## अस्मिन् विषये चिन्तयन्तु

अद्य गृहात् विद्यालयं प्रति गमनमार्गे दृष्टानि विविधानि आर्थिकक्रियाकलापानि स्मर्तुं शक्यन्ते वा येषु जनाः प्रवृत्ताः सन्ति? केषु प्रकारेषु ते जनाः वेतनं प्राप्नुवन्ति इति मन्यते?

वयम् अधुना अवगच्छामः यत् तादृशानि कार्याणि आर्थिकक्रियाकलापाः इति कथ्यन्ते येषां धनस्य दृष्ट्या मूल्यं भवति। आर्थिकक्रियाकलापाः कस्यापि वस्तुनः परिवर्तनप्रक्रियायाः प्रत्येकस्तरे मूल्यवर्धनं कुर्वन्ति। एतद् 'भ्यालु एडिशन' इति कथ्यते। 'भ्यालु एडिशन' इति शब्देन मूल्यवर्धनम् इत्यर्थः बोध्यते।

© NCERT not to be republished

आगच्छन्तु, इदानीम् एतद् अवगन्तुं वयं काव्यायाः पितुः राजेशस्य उदाहरणं पश्यामः।



राजेशः एकः तक्षकः अस्ति, यः पीठोपकरणानि निर्मातुं समीपस्थायाः विपण्याः षट्शतरूप्यकस्य विनिमयेन काष्ठं क्रीणाति।



सः पीठोपकरणानां निर्माणाय विशिष्टानि साधनानि अन्याः सामग्रीश्च उपयुङ्क्ते।



राजेशः विपण्याम् एकसहस्रेण रूप्यकेण एकम् आसन्दं विक्रीणाति।

आसन्दस्य कृते काष्ठस्य मूल्यम् अस्ति षट्शतरूप्यकाणि(६०० रूप्यकाणि)। अतः अवशिष्टं यत् चतुश्शतरूप्यकम् अस्ति (१,००० – ६००) तत् किमर्थम्? इदं राजेशस्य कौशलस्य, समयस्य, प्रयासस्य च आर्थिकमूल्यम् अस्ति, यत् तस्य पीठस्य निर्माणे प्रयुक्तम् आसीत्। राजेशः काष्ठं पीठोपकरणरूपेण परिणमय्य तस्मिन् मूल्यं योजितवान् अस्ति। काष्ठक्रयणाद् आरभ्य आसन्दविक्रयपर्यन्तं एतेषु प्रत्येककार्येषु भुक्तिः अन्तर्भवति। अतः ते आर्थिकक्रियाकलापानां एव भागः अस्ति।

## एहि, वयम् अन्विषामः

यानि कार्याणि/व्यवसायाः धनमूल्यं कल्पयन्ति इति भवन्तः चिन्तयन्ति, तेषां उपरि शुद्धसूचकं ✓ चिह्नं स्थापयन्तु। अन्ते रिक्तपङ्क्तौ अन्यदपि आर्थिकक्रियाकलापद्वयं तस्य उदाहरणद्वयं च योजयितुं शक्यते वा?



| कार्यम् / व्यवसायः | अर्थसंलग्नानां मूल्यनिर्माणानां दृष्टान्ताः |
|---|---|
| १. कान्दविकः | |
| १. सूचकः | |
| ३. कर्षकाः स्वस्य ट्रैक्टरयन्त्रस्य संस्कारं कुर्वन्ति। | |
| ४. वैद्यः | |
| ५. मातापितरः स्वपरिवारजनानां कृते रात्रिभोजनं पचन्ति। | |
| ६. वैज्ञानिकः | |
| ७. कश्चिद् जनः स्वस्य रुग्णपितामहस्य सेवां करोति | |
| ८. | |
| ९. | |

## आर्थिकेतराणां सामाजिककार्याणां महत्त्वम्

यद्यपि एतादृशसामाजिककार्याणां कृते धनं न प्राप्यते तथापि अस्माकं जीवने तेषां नैतिकमूल्यस्य महद् गुरुत्वमस्ति।

### सेवा - स्वार्थरहितं कार्यम्

तत्र बहुषु स्थानेषु वयं सेवाकार्याणि पश्यामः। यथा- गुरुद्वारेषु, मस्जिदेषु, चर्च-इत्यादिषु।

गुरुद्वारेषु लङ्गराः अथवा सामुदायिकपाकशालाः प्रत्येकस्य अतिथेः कृते निःशुल्कं भोजनं ददति। एतानि सेवाकार्याणि अस्माकं मनसि सन्तुष्टेः कृतज्ञतायाश्च भावं जनयन्ति। तथैव

© NCERT not to be republished

अनेन उपायेन तेऽपि कस्यापि प्रतिदानस्य अपेक्षां विना सेवाभावेन समाजे स्वकीयं योगदानं दातुं शक्नुवन्ति।



मन्दिरः भक्तेभ्यः प्रसादं वितरति।



स्वर्णमन्दिरस्थं लङ्गरस्थानम्



स्वच्छ-भारत-अभियानम्



वन - महोत्सवः

## समुदायिकायाः सहभागितायाः बलम्

स्वच्छभारताभियानम् अस्माकं परिसरं स्वच्छं स्थापयितुं सर्वेषां भारतीयनागरिकाणां सामूहिकानां प्रयत्नानाम् उपरि आधारितम् अस्ति। व्यक्तिगतरूपेण वयं स्वगृहं स्वपरिसरं च स्वच्छं स्थापयितुं शक्नुमः। वीथीमार्गोद्यानादीनि सार्वजनीनानि स्थानानि अथवा सामुदायिकानि क्षेत्राणि स्वच्छीकर्तुं जनाः मिलित्वा कार्यं कुर्युः। एते प्रयत्नाः मिलित्वा स्वच्छगृहस्य, स्वच्छपरिसरस्य, स्वच्छसमाजस्य, स्वच्छराष्ट्रस्य च निर्माणं कर्तुं शक्नुवन्ति।

सामूहिकसमुदायसहभागितायाः अन्यद् उदाहरणम् अस्ति वनमहोत्सवः (वनस्य उत्सवः)। भारते अयम् उत्सवः वृक्षाणां गुरुत्वविषये, वनानां संरक्षणस्य च

विषये सचेतनतां प्रवर्धयति। अयम् उपक्रमः वृक्षारोपणस्य कृते समाजस्य सर्वान् जनान् एकीकरोति।

## अस्मिन् विषये चिन्तयन्तु

- भारते बहुषु समुदायेषु एतादृश्यः प्रथाः सन्ति येषु समुदायस्य सहभागिता भवति। किं भवन्तः स्वस्य क्षेत्रस्य विषये एतादृशसामुदायिककार्यक्रमान् चिन्तयितुं शक्नुवन्ति?
- भारते वयम् अनेकान् उत्सवान् आचरामः। एतेषु उत्सवेषु जनाः मिलित्वा विभिन्नप्रकारान् कार्यक्रमान् आयोजयन्ति। ते मिलित्वा स्थानम् अलङ्कुर्वन्ति एवञ्च एकत्र भोजनं निर्माय सर्वेभ्यः परिवेशयन्ति। एते आर्थिकेतरकार्याणि सन्ति वा? एतादृशाः कार्यक्रमाः अपि महत्त्वपूर्णाः सन्ति इति किमर्थं भवन्तः चिन्तयन्ति?
- भवतां विद्यालयेन स्थानीयक्षेत्रेण वा ये कार्यक्रमाः आयोजिताः सन्ति, तानि वक्तुं शक्नुवन्ति वा? तेषु कार्यक्रमेषु भवद्भिः किं किं दृष्टम् आसीत्?

## अग्रे गमनात् प्राग् ...



- → अस्मिन् अध्याये वयम् आर्थिकानां आर्थिकेतराणां च कार्याणां विषये अजानीम
- → आर्थिकक्रियाकलापैः उत्पन्नस्य मूल्यवर्धनस्य विषये अपि वयं ज्ञातवन्तः।
- → आर्थिकेतराः क्रियाकलापाः समाजकल्याणाय व्यक्तिगतहिताय च कथं कार्यं कुर्वन्ति, किञ्च जीवनस्य सामग्रिकविकासाय कथं योगदानं ददति इत्यादीन् विषयान् वयम् अवगच्छामः।

## प्रश्नानि, क्रियाकलापाः परियोजनाश्च

१. आर्थिकाः क्रियाकलापाः आर्थिकेतरेभ्यः क्रियाकलापेभ्यः कथं भिद्यन्ते ?

२. जनाः कीदृशेषु आर्थिकक्रियाकलापेषु प्रवर्तन्ते? उदाहरणमुखेन व्याख्यातु।


३. ये जनाः सामुदायिकेषु सेवाकार्येषु संलग्नाः सन्ति तेषाम् महद् मूल्यमस्ति - इदं वाक्यम् आश्रित्य एकां टिप्पणीं लिखतु।

४. विविधानाम् आर्थिकानां क्रियाकलापानां क्षतिपूर्तिः जनानां कथं भवति ? सदृष्टान्तं विषयमिमं वर्णयतु।

© NCERT not to be republished

# नूडल्स्

© NCERT
not to be republished



* 'नूडल्स्' इति शब्दः नोट्स् डूडल्स् इत्येतयोः शब्दयोः संक्षिप्तं रूपम्।